स्वामिना च क्रीतत्वात् द्रव्यस्वामित्वाभावे यज्ञाधिकारित्वं नास्तीत्याशङ्कायां सहपत्न्याऽधिकार इत्येतत् जै० ६।१।१० सूत्रादौ भाष्ये च व्यवस्थापितं यथा

“द्रव्यवत्त्वात्तु पुंसां स्यात्, द्रव्यसंयुक्तं, क्रयविक्रयाभ्याम् अद्रव्यत्वं स्त्रीणां द्रव्यैः समानयोगित्वात्” १०सू०(पू०)

“पुंसां तु स्यात् अधिकारः, द्रव्यवत्त्वात्, द्रव्यवन्तो हि पुमांसो न स्त्रियः, द्रव्यसंयुक्तं च एतत् कर्म ‘व्रीहिभिर्यजेत, यवैर्यजेत’—इत्येवमादि। कथम्? अद्रव्यत्वं स्त्रीणां’ ‘क्रयविक्रयाभ्यां क्रयविक्रयसंयुक्ता हि स्त्रियः, पित्रा विक्रीयन्ते, भर्त्रा च क्रीयन्ते, विक्रीतत्वाच्च पितृधनानामनीशिन्यः क्रीतत्वाच्च भर्तृधनानाम्। विक्रयो हि श्रूयते, ‘शतमधिरथं दुहितृमते दद्यात्, “आर्षे गोमिथुनम्”-इति च। न च, एतत् दृष्टार्थे-सति आनमनेऽदृष्टार्थं भवितुमर्हति। एवं द्रव्यैः समानयोगित्वं स्त्रीणाम्” भा० “तथाच अन्यार्थदर्शनम्” ११सू०

‘या पत्या क्रीता सती “अथान्यैश्चरति’-इति क्रीततां दर्शयति” भा०

“तादर्थ्यात् कर्मतादर्थ्यम्” १२सू० (आ० नि०) ‘आह, यदनया भक्तोपसर्पणेन वा कर्त्तनेन वा धनम् उपार्जितं, तेन यक्ष्यते,—इति। उच्यते,—तदप्यस्या न स्वं, यदा हि सा अन्यस्य स्वभूता, तदा यत् तदीयं, तदपि तस्यैव। अपिच, स्वामिनस्तया कर्म कर्त्तव्यं न तं परित्यज्य स्वकर्मार्हति कर्त्तुम्। यत् तया अन्येन प्रकारेण उपार्ज्यते, तत् पत्युरेव स्वं भवितुमर्हति—इति। एवं च स्मरन्ति, “भार्य्या दासश्च पुत्रश्च निर्द्धनाः सर्व एव ते। यत्ते समधिगच्छन्ति, यस्य ते तस्य तद्धनम्” इति’ भा०

“फलोत्साहाविशेषात्तु” १३सू० सि०) तुशब्दः पक्षं व्यावर्त्तयति। न च एतदस्ति,—निर्द्धना स्त्री—इति, द्रव्यवती हि सा, फलोत्साहाविशेषात्, स्मृतिप्रामाण्यात् अस्वया तया भवितव्यं फलार्थिन्यापि, श्रुतिविशेषात् फलार्थिन्या यष्टव्यम्, यदि स्मृतिमनुरुध्यमाना परवशा निर्द्धना च स्यात्, ‘यजेत’—इत्युक्ते सति न यजेत, तत्र स्मृत्या श्रुतिर्बाध्येत। न च एतत्—न्याय्यम्। तस्मात् फलार्थिनी सती स्मृतिमप्रमाणीकृत्य द्रव्यं परिगृह्णीयात् यजेत च—इति” भा०

“अर्थेन च समवेतत्वात्” १४सू०

अर्थेन च अस्याः समवेतत्वं भवति, एवं दानकाले संवादः क्रियते,—“धर्म्मे च अर्थे च कामे च न अतिचरितव्यः’—इति। यत्तु उच्यते,-‘भार्यादयो निर्द्धनाः’—इति स्मर्य्यमाणमपि निर्द्धनत्वम् अन्याय्यमेव, श्रुतिविरोधात्। तस्मात् अस्वातन्त्र्यम् अनेन प्रकारेण उच्यते, संव्यवहारप्रसिद्ध्यर्थम्” भा०

“क्रयस्य धर्म्ममात्रत्वम्” १५सू०। (आ०नि०)

यत्तु क्रयः श्रूयते,—धर्म्ममात्रं तु तत्, नासौ क्रयः—इति, क्रयो हि उच्चनीचपण्यपणो भवति। नियतं त्विदं दानं शतमधिरथं, शोभनाम् अशोभनाञ्च कन्यां प्रति। स्मार्त्तं च श्रुतिविरुद्धं विक्रयं नानुमन्यन्ते। तस्मात् अविक्रयोऽयम्—इति भा०

“स्ववत्तामपि दर्शयति” १६सू०

‘पत्नी वै पारिणाय्यस्य ईष्टे—पत्यैव गतमनुमतं क्रियते। तथा “भसदा पत्नीः संयाजयन्ति, भसद्वीर्या हि पत्नयः भसदाश्च एताः परगृहाणाम् ऐश्वर्य्यमवरुन्धते” भा०।

“स्ववतोस्तु वचनादैककर्म्यं स्यात्” १७सू०

स्ववन्तावुभावपि दम्पती—इत्येवं तावत् स्थितम्। तत्र सन्देहः,—किं पृथक् पत्नी यजेत, पृथक् यजमानः उत सम्भूय यजेयाताम्!—इति। किं प्राप्तम्?—पृथक्त्वेन। कुतः?। एकवचनस्य विवक्षितत्वात्, उपादेयत्वेन कर्त्ता ‘यजेत’—इति श्रूयते तस्मात् एकवचनं विवक्ष्यते,—यथा न द्वौ पुरुषौ सम्भूय यजेयाताम्, तथा अत्रापि द्रष्टव्यम्। एवं प्राप्ते ब्रूमः,—“स्ववतोस्तु वचनात्तयोः सहक्रिया एवं स्मरन्ति,—‘धर्म्मे चार्थे च कामे च नातिचरितव्यः’—इति, तथा ‘सह धर्म्मश्चरितव्यः, सहापत्यम् उत्पादयितव्यम्’-इत्युच्यते,—स्मृतिवचनेन श्रुतिवचनं युक्तं बाधितुम्’। न—इति ब्रूमः,—इह किञ्चित् कर्म, स्त्रीपुंसकर्तृकमेव, यथा दर्शपूर्णमासौ—ज्योतिष्टोमः—इति, तत्र पत्न्यवेक्षितेन यजमानावेक्षितेन च आज्येन होम उच्यते, तत्र अन्यतराभावे वैगुण्यम्।

“ननु पुंसो यजमानस्य यजमानावेक्षितमाज्यं, स्त्रिया यजमानायाः पत्न्यवेक्षितं भविष्यति’—इति। न—इति आह,—नायम् ईक्षितृसंस्कारः, ईक्षितुः संस्कारो यदि, तदैवं स्यात्, आज्यसंस्कारश्च अयं, गुणभूतौ ईक्षितारौ, तत्र अन्यतरापाये नियतं वैगुण्यं, सर्वाङ्गोपसंहारी च प्रयोगवचनः। तत्र एतत् स्यात्,—स्त्रीयजमाना पुमांसं परक्रेष्यति आज्यस्य ईक्षितारं, पुमांश्च स्त्रियन्त्वेक्षितीम्—इति। तच्च न, पत्नीति हि यज्ञस्य